## अथ उपवनविनोदः
## प्रस्तावना

पुष्पधन्वा विजयतेऽनङ्गेनाप्यखिलं जगत्
वशीकृतं येन हठात्त् ससुरासुरमानुषम्  १

पुंसां सर्वसुखैकसाधनकराः सौन्दर्यगर्वोदधुर-
क्रीडालोलविलासिनीजनमनः स्फीतप्रमोदावहाः ।
गुञ्जद्भृङ्गविनिद्रपङ्कजभरस्फारोल्लसद्दीर्घिका-
युक्ताः सन्ति गृहेषु यस्य विपुलारामाः स पृथ्वीपतिः  २

नवं मनोहारि वपुर्वराङ्गनाः सखा कलावित् कलवल्लरीस्वनाः
धनानि सर्वं विफलं सुखैषिणो विना विहारोपवनं महीपतेः  ३

## अथ तरुमहिमा

बहुभिर्बत किंजातैः पुत्रैर्धर्मार्थवर्जितैः
वरमेकः पथि तरुर्यत्र विश्रमते जनः  ४

दशकूपसमा वापी दशवापीसमो ह्रदः
दशह्रदसमः पुत्रो दशपुत्रसमस्तरुः  ५

क्रीडारामन्तु यः कुर्यादुद्दामफलसंयुतम्
स गच्छेच्छङ्करपुरं वसेत्तत्रायुतत्रयम्  ६

एतत् सर्वं परिज्ञाय वृक्षरोपं समारभेत्
धर्मार्थकाममोक्षाणां द्रुमेभ्यः साधनं यतः  ७

यावद्दिनानि तुलसी रोपिता यद्गृहे वसेत्
तावद्वर्षसहस्राणि वैकुण्ठे स महीयते  ८

यस्तु संरोपयेद्बिल्वं शङ्करप्रीतिकारकम्

तत्कुलेऽपि सदा लक्ष्मीस्तिष्ठेदापुत्रपौत्रकम्  ९

एवमेव हि योऽश्वत्थं रोपयेद् विधिना नरः
यत्र कुत्रापि वा स्थाने स गच्छेद् भवनं हरेः  १०

तेनेष्टा बहवो यज्ञास्तेन दत्ता वसुन्धरा
सर्वदा ब्रह्मचारी स येन धात्री प्ररोपिता  ११

वटवृक्षद्वयं मर्त्यो रोपयेद् यो यथाविधि
शिवलोके वसेत् सोऽपि सेवितस्त्वप्सरोगणैः  १२

निम्बत्रयं समारोप्य नरो धर्मविचक्षणः
सूर्यलोकं समासाद्य वसेत्तत्र युगत्रयम्  १३

चतुर्णां प्लक्षवृक्षाणां रोपणान्नात्र संशयः
राजसूयस्य यज्ञस्य फलमाप्नोति मानवः  १४

पञ्चाम्रान् रोपयेद्यस्तु मार्गेषूपवनेषु च
भूतान् भविष्यान् पुरुषान् तारयेत् स चतुर्दश  १५

शिरीष शाखिनां षण्णां यः कुर्यात् प्रतिरोपणम्
गारुडं लोकमासाद्य मोदते देववत् सदा  १६

उदुम्बरद्रुमानष्टौ रोपयेत् स्वयमेव यः
प्रेरयेद् रोपणायापि चन्द्रलोके स मोदते  १८

पार्वती तोषिता तेन स भवेच्च निरामयः
पूजिता देवताः सर्वा मधूको येन रोपितः  १९

क्षीरिकाकदलीद्राक्षापियालपनसान्वितान्
तरून् संरोप्य नो दुःखी जायते सप्तजन्मसु  २०

अज्ञानाद् ज्ञानतो वापि जम्बूर्येन प्ररोपिता
गृहेऽपि स वसन्नित्यं यतिधर्मेण युज्यते  २१

अन्यानपि तरून् रोप्य फलपुष्पोपयोगिनः
रत्नधेनुसहस्रस्य फलं प्राप्नोति मानवः  २२

अश्वत्थमेकं पिचुमर्दमेक न्यग्रोधमेकं दश चिञ्चिणीकाः
कपित्थबिल्वामलकत्रयञ्च पञ्चाम्ररोपी नरकं न पश्येत्  २३

इति तरुमहिमा ॥

अथ निवासासन्नतरूणां
शुभाशुभफलानि

गृहस्य पूर्वदिग्भागे न्यग्रोधः सर्वकामदः
उदुम्बरस्तथा याम्ये वारुणयां पिप्पलः शुभः  २४

प्लक्षश्चोत्तरतो धन्यो विपरीतांस्तु वर्जयेत्  ।
वर्जयेत् पूर्वतोऽश्वत्थं प्लक्षं दक्षिणतो गृहात्  ।
पश्चिमे चैव न्यग्रोधं तथोदुम्बरमुत्तरे  २५

देवदानवगन्धर्वाः किन्नरोरगराक्षसाः
पशुपक्षिमनुष्याश्च संश्रयन्ति सदा तरून्  २६

बदरी कन्दली चैव दाडिमि बीजपूरकम्
प्ररोहन्ति गृहे यस्य तद्गृहं न प्ररोहति  २७

सर्वासां वृक्षजातीनां छाया वर्ज्या सदा गृहे
अपि सौवर्णिकं वृक्षं गृहे द्वारे न रोपयेत्  २८

पलाशः काञ्चनालश्च तथा श्लेष्मान्तकार्जुनौ
करञ्जश्चाप्यमी वृक्षा निन्दिता गृहसन्निधौ  २९

आसन्नाः कण्टकिनो विषभयदाः क्षीरिणोऽर्थनाशाय
फलिनः प्रजाक्षयकरा दारूण्यपि वर्जयेच्चैषाम्  ३०

नीलीं हरिद्रां च नरः सदोप्त्वा पुत्रैर्धनैश्च क्षयमभ्युपेयात्
एतांस्तु सर्वान् स्वयमेव जातान् छिन्द्यादृषीणां वचनाद् विधिज्ञः  ३१

कुर्यान्न याम्ये नैर्ऋत्यामेतेष्वपि हि वाटिकाम्
अन्यथा कलहो द्वेषः कष्टं वा लभते कृते  ३२

तस्माद्राज्ञां हि शुभदं पुत्रशान्तिप्रवर्धनम्
पश्चिमोत्तरपूर्वेषु भवेदुपवनं कृतम्  ३३

इति निवासासन्नतरूणां शुभाशुभफलनिरूपणम्  ॥

अथ वृक्षोपयुक्तभूमिनिरूपणम्

जाङ्गलानूपसामान्यभेदैः सा भिद्यते मही
पुनः सा भिद्यते षोढा वर्णतो रसतस्तथा  ३४

असितविपाण्डुश्यामललोहितसितपीतरोचिषः क्रमशः
मधुराम्ललवणतिक्तकटुकषाया भुवो रसतः  ३५

विषपाषाणवल्मीकविलदुष्टा तथोषरा
दूरोदका शर्करिला तरुभ्यो न हिता मही  ३६

इन्द्रनीलशुकपक्षकोमला शङ्खकुन्दकुमुदेन्दुसन्निभा
तप्तकाञ्चनविकासिचम्पकस्पर्धिनी वसुमती प्रशस्यते  ३७

समा समासन्नजला हरित्तरुतृणाङ्कुरा
तस्यां भूम्यां यथास्थानं प्ररोहन्ति महीरुहाः  ३८

न जाङ्गला नवाऽनूपा भूमिः साधारणी शुभा
तस्यां सर्वेऽपि तरवः प्ररोहन्ति न संशयः  ३९

पनसलकुचताला वंशजम्बीरजम्बूतिलकवटकदम्बाभ्रातखजूरपूगाः
कदलितिनिशमृद्वीकेतकीनारिकेलप्रभृतय इति चान्ये प्रायशोऽनूपजाः स्युः
४०

बीजपूरकपुन्नागाश्चम्पकाम्रातमुक्तकाः
प्रियङ्गुदाडिमाद्याश्च साधारणसमुद्भवाः  ४१

निधिदेवमहीपानां प्रभावाच्चातियत्नतः
असाध्यभूमिसम्पन्ना अपि सिद्धयन्ति पादपाः  ४२

इति भूमिनिरूपणम्

अथ पादपपरीक्षा

वनस्पतिद्रुमलतागुल्माः पादपजातयः
बीजात् काण्डात्तथा कन्दात्तज्जन्म त्रिविधं निदुः  ४३

ते वनस्पतयः प्रोक्ता विना पुष्पं फलन्ति ये
द्रुमाश्चान्ये निगदिताः पुष्पैः सह फलन्ति ये  ४४

प्रसवन्ति प्रतानैर्यास्ता लताः परिकीर्तिताः
बहुस्तवा विटपिनो गुल्मास्ते परिकीर्तिताः  ४५

जम्बूचम्पकपुन्नागनागकेसरचिञ्चिणी
कपित्थबदरीबिल्वकुतकारीप्रियङ्गवः  ४६

पनसाम्रमधूकाद्याः करमर्दाश्च बीजजाः
ताम्बूली सिन्दुवारश्च तगराद्याश्च काण्डजाः  ४७

पाटलादाडिमी प्लक्षकरवीरवटादयः
मल्लिकोदुम्बरः कुन्दो बीजकाण्डोद्भवा मताः  ४८

कुङ्कुमार्जुनसोनालुकन्दाःकन्दसमुद्भवाः

एलापदमोत्पलादीनि बीजकन्दोद्भवानि च ४९

इति पादपपरीक्षा

अथोप्तिविधिः

सम्यक् कृष्टे समे क्षेत्रे माषानुप्त्वा तिलांस्तथा
सुनिष्पन्नानपनयेत् तत्र बीजोप्तिरिष्यते ५०

अथात्र पक्वात् फलतो विशोधिताद् विकृष्य बीजं पयसा निषिच्य च
विशोषयेत् पञ्च दिनानि सर्पिषा विडङ्गमिश्रेण च धूपयेत्ततः ५१

क्षीरतिषिक्तं बीजं बृहतीतिलभस्मसर्पिषा लिप्तम्
गोमयमृदितमथोप्तं सद्यो जायेत धूपितं रसया ५२

पयसि निषिक्तं बीजं गोमयपरिमर्दिते विशोध्य ततः
माक्षिकबिडङ्गचूर्णैर्बहुशो मृदितं प्रजायेत ५३

जम्बूपनसचूतानां सरलं लकुचस्य च
क्षीरसिक्तं वपेद्बीजं घृतगोविड्बिडङ्गवत् ५४

शुचिः स्नातो बिभ्रद्वसनममलं पूजितसुरो
गुरुं नत्त्वा दत्त्वा वसु वसुमतीं वा गुणवते ।
स्वयं बीजान्यादौ वपति कतिचिद् बास्तुपुरुषं
प्रणम्याथो भक्त्या तदनु परितोऽन्यैः परिजनैः ५५

बीजधानीं तृणास्तीर्णां कृत्वा सिञ्चेत्पयोऽम्बुना
जाताङ्कुराञ्च सलिलैर्निस्तृणां शोधमानयेत् ५६

इति बीजोप्तिविधिः ॥

अथ वृक्षारोपणम्

अयथाविहितानां यन्मनोज्ञतासम्पदौ न स्तः

कथयाम्यतस्तरूणां रोपविधानं यथोद्दिष्टम्  ५७

ध्रुवमृदुमूलविशाखा गुरुभं श्रवणस्तथाऽश्विनी हस्तः
उक्तानि दिव्यदृग्भिः पादपसंरोपणे भानि  ५८

हस्त प्रमाणान् पयसा सुसिक्तान् संक्रामयेन्मूलवतः समृत्कान्
सर्वान् मधूत्सारविडङ्गलिप्तान् विले निदध्यात्तु करीषयुक्ते  ५९

अथान्यश्लक्ष्णमृद्भिश्च पूरिते गर्तशोधनम्  ।
कोदण्डार्धमिते खाते जलसिक्ते वपेत्तरून्  ॥
कदलीक्षीरिणौ रोप्यौ मूले दत्त्वा तु गोमयम्  ६०

रम्भायाः सुविहितवल्कलैर्विषिक्तैः संशुष्कां भुवि निहितां पलालरज्जुम्
शुद्धायामुपरि तयाऽवगूढगुप्तामासिञ्चेद् बहुसलिलैर्बहून्यहानि  ६१

सा रज्जुस्तदनु तमालनीलघासान् बिभ्राणा कनकरुचोऽङ्कुरान् प्रसूते
भूयस्तानुपचितपत्रकाण्डमूलान् आरोप्य प्रथितगुणानतो निषिञ्चेत्  ६२

आषाढे श्रावणे चापि बीजवापनरोपण
ग्रीष्मादन्यत्र वल्लीनां केचिदिच्छन्ति रोपणम्  ६३

मण्डपनद्यावर्तस्वस्तिकचतुरस्त्रसर्वतोभद्रैः
वीथीनिकुञ्जपुञ्जकविन्यासैः पादपा रोप्याः  ६४

दशविंशतिषोडशभिस्तु करैरधरोत्तरमध्यकृतान्तरकान्
द्विचतुस्त्रिभिरन्तरितान् क्रमशस्तृणपादपगुल्मभृतश्च वपेत्  ६५

सान्द्ररोपणमवृद्धिकारणं वातभीतिरतिदूररोपणात्
भिन्नवर्गसमवाप्तपीडनान्नैव युक्तिरियमेव शस्यते  ६६

कुसुमं न फलं खलु भोगकरं फलितस्य न यस्य दलं न शिफाः

कुसुमेन विनैव फलन्ति च ये न भवन्ति शुभास्त इहापनसाः ६७

मातुलुङ्गरजनी सकष्टकाः किंशुकश्च गिरिकर्णिका सिता
तिन्तिणीक विफलाक्षनीलिका कोविदार इति भीतिदो गणः ६८

मल्लिकाऽशोकपुन्नागशिरीषनिम्बकण्टकाः
मङ्गल्याः प्रथमं रोप्या विज्ञेयाश्च गदापहाः ६९

पूर्वस्यां करमर्दवंशविटपाः पारावता दक्षिणे
कौबेर्यां बदरीकपित्थतरवोश्चात्री च पश्चाच्छिवा ।
अन्ये चोत्तममध्यमाश्चमशिफा रोप्याः स्ववर्गैः सम
कृत्वा चान्तरकं यथायथममी पत्रैरुपर्यस्पृशः ७०

इति वृक्षारोपणविधिः

अथ निषेचनम्

सर्वस्यापि नवोप्तस्य सायं प्रातर्निषेचनम्
वर्षासु च शरत्काले यदा वृष्टिर्न जायते ७१

तदा देयं जलं तज्ज्ञैरालवाले महीरुहाम्
शीतातपसमा रोप्या रक्षेच्च सुविधानतः ७२

हेमन्ते शिशिरे देयं तोयं चैकान्तरे दिने
वसन्ते प्रत्यहं ग्रीष्मे सायं प्रातर्निषेचनम् ७३

यावता वारिणा यस्य मूले सौहित्यमिष्यते
तावत्तस्य तरोर्देयं किं घटार्थिविवक्षया ७४

आलवालस्थितं तोयं शोषं न भजते यदा
अजीर्णं तद्विजानीयान्न देयं तादृशं जलम् ७५

समीपजातं यत्नेन तृणगुल्मलतादिकम्

स्फेटनीयं प्रयत्नेन द्रुमाणां वृद्धिमिच्छता ७६

इति निषेचनम्

## अथ रक्षा

नीहाराच्चण्डवाताच्च धूमाद् वैश्वानरादपि
जालकारात्प्रयत्नेन रक्षणीया महीरुहाः ७७

पङ्क्तिमध्ये सुपुष्पाणां मुकुलानां ततः परम्
वृक्षाः कार्या युता वृत्त्या सा चापि परिखावृता ७८

विद्युदाहतवृक्षस्य भूतिमादाय सर्वतः ।
रक्षार्थं विकिरेदेषां तया न हिमबाधनम् ॥
दीप्तोऽप्यग्निः शमं याति वज्रदग्धद्रुभस्मना ७९

मितशाल्योदनं दध्ना सैन्धवेन युतं वने ॥
क्षेपणीयं च परितो गदानां वृद्धिवारणम् ८०

शलभादिपतङ्गानां पिपील्यादेर्भये सति
अष्टोत्तरशतं जप्त्वा मन्त्रं पत्रे तरोर्लिखेत् ८१

मन्त्रः--

ओम् स्वस्ति किष्किन्धास्थितप्रकटपराक्रमान्तर्हितार्कमण्डलोपजीवितः
श्री हनुमानाज्ञापयति मूषकपतङ्ग पिपीलिकाशलभकरट शुककीट
गन्धिकानिवहैर्न स्थातव्यम् । आज्ञापयति क्रममाणस्य शरीरनिग्रहः
समावर्तयति ।

तस्य वानरसिंहस्य क्रममाणस्य सागरम्
कक्षान्तरगतो वायुर्जीमूत इव गर्जति ॥ हूँ फट्नमः ८२

पत्रे मनुं समालिख्य जप्त्वा तन्निखनेद्भुवि
क्षेत्रे कीटपतङ्गाखुपिप्पल्यादिर्विनश्यति ८३

इतिरक्षा

अथोपवनक्रिया

वनप्रवालस्थगितातपानि विकीर्णपुष्पाणि समीरणेन
गृहाणि कुर्यादतिमुक्तकानां लताभिरालोलमधुव्रताभिः ८४

स्थानेष्वपरेषु तथा पादपगुल्मेषु मिथुनसंवाह्याः
शाखावलम्बिनीभिर्दोलाः कार्या लताभिश्च ८५

तरुविटपलता निकुञ्जरम्या विरचितकन्दरसानुगण्डशैला
विविधमणिगुहाविचित्रधातुः क्वचिदपि पर्वतिकविहारहेतुः ८६

केकानिनादसुभगाः सदा सन्त्रासिताहयः
ताण्डवेन तदुद्देशान्मण्डयन्ति शिखण्डिनः ८७

विलम्बिता यत्र तटद्रुमा वपुर्विलोकयन्ति प्रसवेक्षणैरिव
शमं दिशन्तः कलहंसभूषणा क्वचिद्भवेत्पुष्करिणी मनोरमा ८८

निर्यादःसलिलां सुखावतरणीं तीरे सपुष्पद्रुमां
कूजत्कान्तविहंगमां सतरणीमत्यायतां दीर्घिकाम् ।
कुर्यात्तत्र समुच्छलत्कमलिनी पत्राङ्कुरश्यामलां
श्यामां लोत्तनमालिकां विदधतीं नीलोत्पलानां क्वचित् ८९

उपनवमिव वारिमध्यमग्नं विमलतया प्रतिविम्बितं दधाना
शशिकरनिकरेण पूरितेव क्वचिदभिनव्यजला सुखाय वापी ९०

मध्ये तस्मिन् शिखरिशिखरस्पर्द्धवेश्मप्रवर्ति-
गूढोपान्तं सुरभिकुसुमैः शाखिभिर्नभ्रशाखैः ।
स्थाने स्थाने स्फटिकधवलं मण्डपं मण्डलार्हं
कुर्यात्कस्मिँश्चिदपि कदली मन्दिरं मन्दवायु ९१

क्वचिदपि कूपं कुर्यादुपवनदेशे सुपुष्टसलिलभुवम्
संसिक्तसकलविटपं बद्धं पाषाणसंचयैः परितः ९२

अञ्जनमुन्तोशीरैः सराजकोशातकामलकचूर्णैः
कतकफलसमायुक्तैर्योगः कूपे प्रदातव्यः ९३

कलुषं कटुकं लवणं विरसं सलिलं यदि वाऽशुभगन्धि भवेत्
तदनेन भवत्यमल सुरसं सुसुगन्धि गुणैरपरैश्च युतम् ९४

इत्युपवनक्रिया ॥

अथ पोषणम् ॥

फलकुसुमसम्पदुचिता पोषणतो भवति केवलान्न यतः
पोषणविधिमथ सम्मतमनोकहानामतो वक्ष्ये ९५

खर्जूरबिल्वलकुचाः सितसर्षिपेण पिण्याकतश्च तुषवारिरसेन चाम्राः
ऐरावतानि चुकपत्रजलोक्षितेन सव्रीहिमांससलिलेन च यान्ति वृद्धिम् ९६

प्राचीनामलकयोः प्रिया हि माषाः क्षीराम्भो हितमिह बालतिन्दुकानाम्
प्रीयन्ते यवरजसा च नारिकेलाः सर्वेषां भवति रुचिर्हि निम्नभूमौ ९७

कुरङ्गकिटिसारङ्गश‍ृगालाश्वादिमेदसा ।
क्वथितेन सुदुग्धेन पञ्चपल्लववारिणा ।
कृतसेको भवेदाशु सहकारोऽतिसौरभः ९८

घृतकुणपवचावराहविष्ठासलिलमतीव सुखाय दाडिमानाम्
क्वथितमधुकुलत्थचूर्णकं वा जलमपि वृद्धिकरं सदा शफर्याः ९९

यस्त्रिफलाः शफरीघृतलिप्तो धूपित आज्यफलत्रयधूपैः
आशु फलैरिह दाडिमशाखी तालफलानि विडम्बयतीव १००

दधिमस्तुकाञ्जिकसुरावदरीतिलमेथिका कुणपसीधुपयः

फलिनीकदम्बकरिकेसरकान् कुरुते सुगन्धिबहुपुष्पयुतान् १०१

प्रियङ्गुगुञ्जाफलनिरवपिप्पलीवचाहरिद्रातिलसर्षपैः समैः
घृताश्वार्णाम्बु विलोड्य पातयेत् सचम्पके नागतरौ सुवृद्धिदम् १०२

सिक्ताऽम्भोभिः पनसयवयोः कुक्कुटानां पुरीषं
मूले दत्त्वा सुकुसुमफला गोस्तनी वृद्धिमेति ।
स्कधन्यस्तैः पनसतरवोऽप्याशु पालाशभारै-
र्मूलादग्रं दधति च वचा वारिसिक्ताः फलानि १०३

सर्पिगुडक्षीरमधूपचारं दत्त्वा निषिक्तौ च कपित्थबिल्वौ
पीपूषकल्पान्यतिमांसलानि फलान्यनस्थीनि सदा दधाति १०४

कोशातकीदलशिफाक्वथितामिषाम्भः
संसेवनाच्च सुकणारजसा च युक्तः ।
लब्धोपचारमथ धूपजलाभिषिक्तः
शोभां बिभर्ति नितरां मधुरो मधूकः १०५

तिलयष्टीमधुमिश्रतजलसेकात्तर्पिता बदरी
कुणपैरुपचितमूला फलति फलं शर्करामधुरम् १०६

अजैडकाशूकरविड्विडङ्गकृतोपचारेण च बीजपूरः
भूयोऽश्वमूत्राविलवारिसिक्तः फलानि धत्ते सुबहूनि शश्वत् १०७

वृश्चिककणटकविद्धा सुरभीकृत धूपिता निखिललताः
मूषककोलवसाभिः संसिक्ताः स्युः फलैर्नम्राः १०८

सुरभिजलनिषेकतो निदाघे कुणपजलेन च केतकी निषिक्ता
जलधरसमये सुगन्धिसूचीचयनिचितानि बिभर्त्ति पल्लवानि १०९

यस्य कस्यापि पुष्पस्य सौरभेणाधिवासितान्

मृत्तिकाशकलान्मूले वृक्षाणां बहुलान् क्षिपेत्  ११०

कुष्ठपत्रसुरामुस्तातगरोशीरचूर्णकैः
मिश्रितेनाम्भसा सेकस्तस्मात्सौरभसम्भवः  १११

कुल्माषदन्तिदन्तानां चूर्णयुक्पङ्कसंभवा
प्रत्यहं पुष्पिताऽम्भोजमण्डिता पद्मिनी भवेत्  ११२

सिद्धार्थः कदलीदलानि शफरी विट् कोलमार्जारयोः
एतेषां समभागमाज्य सहित चूर्णं तरुभ्यो हितम्  ।
दत्तं धूपविलेपनोपचरणैराप्यायनं रोगहृ-
च्छाखापल्लवयत्परं मधुकरव्यालोलपुष्पच्छदः  ११३

धूपो घृतस्य समृदो यववारिसेको
नित्यञ्च दुग्धसलिलैः कुणपाम्बुभिर्वा  ।
लेपो विडङ्गतिलकल्ककृतः शिशूनो
वृद्धिं करोति परमां खलु भूरुहाणाम्  ११४

अङ्कोलक्वाथतोयेन मिश्रितं धृतमाक्षिकम्
वसा किटिकुरङ्गानामेतैः सिक्ता महीरुहा  ११५

सिद्धार्थकफलोपेताः सर्वदा फलशोभिताः
जायन्ते पुष्पपत्राढ्या सच्छाया रोगवर्जिताः  ११६

यष्टीमधूकपुष्पाणि सिता कुष्ठं समाक्षिकम्
निष्पीड्य गुटिकां कृत्वा मूले सर्वत्र निःक्षिपेत्  ११७

दुग्धसेकञ्च वृक्षस्य यस्य कुर्याद्विचक्षणः
सुनिश्चितं फलं तस्य मधुरं जायते भृशम्  ११८

इति पोषणविधिः

अथ कुणपजलम्

कुरङ्गकीटिमत्स्यानां मेषच्छागलखड्गिनाम्
मांसं ग्राह्यं यथालाभं मेदो मज्जा वशास्तथा ११९

एकत्र कृत्वा तान् सर्वान् वह्नौ नीरेण पाचयेत्
संपक्वं हि क्षिपेद् भाण्डे तत्र दुग्धञ्च निःक्षिपेत् १२०

चूर्णयित्वा खली देया तिलानां माक्षिकं तथा
स्विन्नाँश्च सरसान् माषान् तत्र दद्या घृतं तथा १२१

उष्णं जलं क्षिपेत्तत्र मात्रा नास्तीह कस्यचित् ।
पक्षैकं स्थापिते भाण्डे कोष्ठस्थाने मनीषिभिः ॥
कुणपस्तु भवेदेष तरूणां वृद्धिकारकः १२२

इति कुणपजलम्

अथतरूचिकित्सा

नराणामिव वृक्षाणां वातपित्तकफाद्रुदाः
सम्भवन्ति निरुप्याथ कुर्यात्तद्दोषनाशनम् १२३

कोटजग्धेऽग्निसंस्पृष्टे वातभग्नेऽशनिक्षते
वृक्षच्छेदोपचारादि पीडिते च पृथक्तया १२४

कृशो दीर्घो लघू रुक्षो निद्राहीनोऽल्पचेतनः
धत्ते न फलपुष्पाणि वातप्रकृतिकस्तरुः १२५

आतपासहनः पाण्डुः शाखाहीनो मुहुर्यदि
अकालफलपाकी स्यात् शाखी पित्तामयः कृशः १२६

स्निग्धशाखादलः शाखी सम्यक् पुष्पफलोज्ज्वलः
लतापरीतगात्रस्तु स भवेत् कफपीडितः १२७

कटुतिक्तकषायरसै पवतः पित्तं कटूष्णलवणाम्लैः
स्निग्धमधुरलवणाम्लैः श्लेऽमा कापं प्रयाति तरोः १२८

सुस्निग्धैः पिशितरसैः प्रयाति वातः
सुस्निग्धैर्मधुरजलैश्च याति पित्तम् ।
कट्वम्रैरहिमजलैः कषायरूक्षैः
श्लेष्माऽपि क्रमविहितैः प्रयाति नाशम् १२९

रीक्ष्यं ग्रन्थिश्च गुटिका वाताद् वृक्षस्य जायते
गाविड् लोध्रवशाभिश्च कुणपैस्तज्जयो भवेत् १३०

दोषैर्यस्य विना प्रबालकुसुमैः स्युर्निर्विरूढं वपुः
मूले तस्य तरोर्भवन्ति कृमयो यत्नाच्च तानुद्धरेत् ।
गोमूत्राज्यविडङ्ग सर्षपतिलैर्लिप्ते प्रवृद्धैस्तनः
सिक्तः क्षीरजलैरुदेति सहसा धूपैश्च धूपायितः १३१

करञ्जारग्वधारिष्टसप्तपर्णत्वचाकृतः
उपचारः कृमिहरो मूत्रमुस्तबिडङ्गवान् १३२

कृणपजलनिषिक्तमूलभागः
सरसिजकन्दविलिप्तसर्वगात्रः ।
तरुरनलहतो बिभर्त्ति भूयो
मरकतकान्तिनिभानि पल्लवानि १३३

प्लक्षार्कोदुम्बरत्वग् धृतमधुमधुरोच्छिष्टदुग्धैर्विलिप्तः
स्तम्भैरुत्तभ्य रज्जो वा परिकलिततवपुः पूरितः श्लक्ष्णमृद्भिः
सिक्तः क्षीरेण भूयो जलभरिततलक्ष्चण्डवातादिभग्नः
स्वस्थीभूताङ्घ्रिपाणिः कुसुमफलभरैरातनोत्ति प्रमायम् १३४

वृक्षस्याशनिदग्धस्य जीवनं शृणु भेषजम्
घनोशीरमधूकैश्च मुदगा माषास्तिला यवाः १३५

पिष्टाः क्षीराम्बुसंयुक्तैः सेचयेत्तमभीक्ष्ण शः
सुसेकाप्यायितः शीघ्रं प्रकृतिस्थो भविष्यति १३६

जनयित्वा फलकुसुमं यः पुनरुपयाति वन्ध्यतां शाखी
स क्षीरैः कुणपजलैः भूयः सिक्तः फलत्येव १३७

असेकतोऽत्यन्तनिषेकतश्च शाखविशोषं फलिनो निरुप्य
सप्ताहमात्रश्शृतसर्पिषा च विडङ्गदुग्धेन निषेचनीयम् १३८

तन्मूलशूलं परशुप्रहारैः विश्रावित्तं दोषशतं निहन्यात्
क्षौद्राज्यजन्तुघ्नतिलैः प्रलिप्तं मृत्पूरितं दुग्धजलैर्निषिञ्चेत् १३९

अनिद्रता मत्स्यसुगन्धिता च प्रवालहानिः सपिपीलिकत्वम्
त्वग्भ्रंशिता वारिकतादजीर्णात् तरोर्भवेत्तत्र चिकित्सनीयम् १४०

शर्कः पतिलगोक्षीरवारिसेकात्तथा तरोः
शोषः शाम्यति वृक्षस्य लेपधूपोपचारतः १४१

प्रियङ्गफलकर्कारी वेतसार्जुनवल्कलैः
क्षीरसिक्तैर्तिलिप्तानां श्रावः शाम्यति शारिवत्ताम् १४२

इति तरुचिकित्सा

अथचित्रीकरणम्

वृक्षायुर्वेदफलं मनोहरं शास्त्रतः सिद्धम्
नानाविधानचित्रं चित्रीकरणं प्रवक्ष्यामि १४३

सुरभिसुमनोलब्धामोदान्निधाय च मृत्तिका
धवरवदिरयोः क्वाथम्भोभिः सुगन्धिभिरुक्षणात् ।
मलयजरजोलेपाद धूपाद् घृतस्य च भूरुहां
व्रजति कुसुमं निर्गन्धानामतीवसुगन्धताम् १४४

यवतिलनिशापलाशैरुपचितमूला तदम्बुसिक्ता च
ज्वलदनलोपममसकृत् कार्पासं तूलकं सूते १४५

शाल्मलीत्वङ्गिनशानीली त्रिफलाकुष्ठशीधुभिः
सकृल्लेपोपचारेण शुकपक्षनिभं भवेत् १४६

मञ्जिष्ठायवतिलपीतसारसारैर्जीवन्तीदलसहितैर्मनः शिलाजै
गोजाविप्रचुरपयः शृतैर्विलिप्तात् कार्षासात् प्रभवति तूलकं खनीलम् १४७

लाक्षारसैः सेव्यमाना
मल्ली रक्तायते ध्रुवम् १४८

संपक्केक्षुरसान्वितविदारिकन्देन लिप्तम्लस्य
सिक्तस्येक्षुरसेन च तरोरकाले भवन्ति कुसुमानि १४९

तिलखलविडङ्गगोमयविलोडितेक्षुरससेवितस्य तरोः
फलकुसुममकालभवं मनोहरं फलति लोकस्य १५०

मधुयष्टिसिताकुष्ठमधुपुष्पविनिर्मितैः
मोदकैश्छादिते मूले निरस्थि स्यात्फलं तरोः १५१

मधुककुसुमगुञ्जाशर्करोदुम्बराज्यं
समधुनिक्तिमत्तः काण्डमुत्कीर्य बद्ध्वा ।
उपरि च परिलिप्तं तत्त्वविद्भिस्तरूणां
जनयति फलमेतत् स्वादु सेकादनस्थि १५२

तत्कालनिहतस्योच्चैश्छागस्य स्कन्धचर्मणा
बद्धायां वृक्षशाखायां फलपाको न जायते १५३

करिमदमृदितवलीमुखनलकैर्मूलेषु कीलितस्य तरोः
संवत्सरं न यावत् फलितस्य फलानि पच्यन्ते १५४

बद्ध्वा चर्मतृणाभ्यां विडङ्गमधुदुग्धलेपनाल्लिखिता
शाखा पयोऽम्बुसेकाच्चिरमपि पक्वं फलं धत्ते १५५

मीनकोलवसामांसदुग्धसेकेन धूपनात्
सर्वबीजानि साश्चर्यमुत्तिष्ठन्ति फलन्ति च १५६

अङ्कोलतैलशूकरशिशुमारवसासुभावितं बीजम्
सद्यो रोहति निहितं भूमौ करकाम्भसा सिक्तम् १५७

बीजञ्चाम्रादिवृक्षाणां पक्वमीनफलाम्बुनि
अङ्कोलतैलदुग्धाढ्यं निहितं बृहितं भवेत् १५८

भश्मन्यामेलितं शुष्कमुपृमुदभिद्यते सह
फलेनाशेषलाकस्य कृतकौतुकमञ्जसा १५९

एकविंशतिवारेण कुक्कुटस्यासृजोक्षितम्
तत्क्षणाद्दाडिमी बीजं वर्द्धते फलति ध्रवम् १६०

मत्स्यकोलवसामांसवणकक्षारभावितम्
यस्य कस्यपि वा बीजं द्रुतपुष्पफलं भवेत् १६१

स्कन्धतः समन्ततश्च शूकरास्थिभिर्दृढम्
कीलितो न संशयं विनाशमेत्यनोकहः १६२

कुलत्थक्वाथतोयेन तरुः पुष्पं फलं त्यजेत्
किंशुकार्जुनतर्कारीलवणाम्बूक्षणेन वा १६३

नानावर्णं घटितं कन्द कुमुदस्य सूत्रसंघटितम्
मधुघृतविलिप्तमुप्तं सूते कुसुमं तथावर्णम् १६४

माहिषकरीषमूत्रैर्मृदितं शुष्कं दिनानि यत्सप्त

कुमुदफलबीजमुप्तं जनयति करवीरविटपं तत्  १६५

कूष्माराडवृन्ताकपटोलकादिबीजं वसाभावितमुप्तसिक्तम्
विशोधितायां भुवि सर्वकालं फलान्यनस्थीनि महान्ति धत्ते  १६६

वार्ताकबीजं घ्रतमाद्मिकार्कविशोषितं गोमयलिप्तरन्ध्रे
बालस्य कूष्माराडफलस्य पक्वतलाद् गृहीतं फलितं महत् स्यात्  १६७

मन्दारद्रुमरन्ध्रेया कौष्माराडी निर्गता लता
मृद्गोमयवृते तस्मिन् सिक्ते फलति सा तदा  १६८

शूकरासृग्वसासिक्तमङ्कोलतैलभावितम्
एरराडबीजं कारल्लीफलं सूतेऽति कौतुकम्  १६९

खरतुरगविडनिवेशित त्तापितशलाकया मूले
तिर्यग् विद्धा कदली फलति फलं करिकराकारम्  १७०

कौलशोणितमेदाभ्यामङ्कोलक्वथितेन वा
सिञ्चिता कदली सूते दाडिमीफलमुत्तमम्  १७१

नरमांसवसारक्तदन्तिदन्तविचूर्णितैः
मिश्रितेनाम्भसा सिक्ता रम्भा चूतफलं भवेत्  १७२

अङ्कोलकथितं श्विन्नं नृमांसं छागिदुग्धयुक्
पिरायाकसहितं मूले सहकारस्य निःद्मिपेत्  १७३

द्राद्मावल्लीसमाकारः सहकारः सदाफलः
जायते निश्चितं धात्ते सर्वैषामद्भुतं फलम्  १७४

शशकूर्मासृङ्मध्ये बहुभावितमाम्रजं बीजम्
रूढं सिक्तं दुग्धैः फलति फलं सवकालेषु  १७५

कृमिरिपुयवयष्टीमधुगुडदुग्धविलेपितो विशिष्य तरुः
भवति जलदुग्धसिक्तः स्वभावतिक्तोऽपि मधुरफलः १७६

बीजं नरपलाङ्कोलतैलभिन्नं शुभं सदा
उद्गच्छति मृदा पूर्णमम्भः सिक्तकरो क्षणात् १७७

अङ्कोलतैलभावितमुषितं गोशकृतिकुमुदकुन्दसमम्
करकाम्बुकर्दमभृते कलशे कुसुमं समुद्भवति १७८

गोकोलास्थिकरीषैस्तु दग्धे गर्ते विशोधिते
उप्तं च बालुकापूर्णे मूलकं गर्तवद्भवेत् १७९

इष्टकचितं समन्तात् पुरुषनिखातेऽवटौ तरुर्जाताः
वामन एव हि धत्ते फलकुसुमं सर्वकालीनम् १८०

इति चित्रीकरणम्
समाप्तश्चायमुपवनविनोदः